॥ श्री नारायणस्तोत्रम् ॥

नमो भगवते तस्मै केशवाय महात्मने ।
यन्नामकीर्तनात् सद्यो नरकाग्निः प्रशाम्यति ॥ १ ॥

भक्तप्रियाय देवाय परस्मै हरये नमः ।
लोकनाथाय शांताय यज्ञेशायादिमूर्तये ॥ २ ॥

अनंतायाप्रमेयाय नरसिंहाय ते नमः ।
नारायणाय गुरवे शंखचक्रगदाभृते ॥ ३ ॥

वेदप्रियाय महते विक्रमाय नमो नमः ।
वराहायाप्रतर्क्याय वेदांगाय महीभृते ॥ ४ ॥

नमो द्युतिमते नित्यं ब्राह्मणाय नमो नमः ।
वामनाय बहुज्ञाय वेदवेदांगधारिणे ॥ ५ ॥

बलिबंधनवृत्ताय वेदपालाय ते नमः ।
विष्णवे सुरनाथाय व्यापिने परमात्मने ॥ ६ ॥

चतुर्भुजाय शुद्धाय शुद्धद्रव्याय ते नमः ।
जामदग्न्याय रामाय दुष्टक्षत्रांतकारिणे ॥ ७ ॥

रामाय रावणांताय नमस्तुभ्यं महात्मने ।
अस्मानुद्धर गोविंद पूतिगंधिन् नमोऽस्तु ते ॥ ८ ॥

स्तोत्रमेतत् पठेद्यस्तु निरयान्मुच्यते च सः ।
नास्त्यत्र संशयः स्वल्पः प्रत्यहं पाठमाचरेत् ॥ ९ ॥

॥ इति श्रीनृसिंहपुराणे श्रीनारायणस्तोत्रम् ॥